# Shri Narayana Kavacham

# શ્રીનારાયણકવચમ્

## Document Information

Text title : nArAyaNa kavachaM

File name : narayana-kavacha.itx

Category : kavacha, vishhnu, narayana, vyAsa, vishnu

Location : doc_vishhnu

Author : Maharshi Vyas

Proofread by : PSA Easwaran

Description-comments : bhAgavatamahApurANa pAramahaMsyAM saMhitAyAM shhashhThaskandhe nArAyaNavarmakathanaM nAmAshhTamo.adhyAyaH

Latest update : January 19, 1999, December 4, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2024

*sanskritdocuments.org*

Shri Narayana Kavacham

# શ્રીનારાયણકવચમ્

ૐ શ્રીગણેશાય નમઃ ।

ૐ નમો નારાયણાય ।

અઙ્ગન્યાસઃ -

ૐ ૐ નમઃ પાદયોઃ ।

ૐ નં નમઃ જાનુનોઃ ।

ૐ મોં નમઃ ઊર્વોઃ ।

ૐ નાં નમઃ ઉદરે ।

ૐ રાં નમઃ હૃદિ ।

ૐ યં નમઃ ઉરસિ ।

ૐ ણાં નમઃ મુખે ।

ૐ યં નમઃ શિરસિ ॥

કરન્યાસઃ -

ૐ ૐ નમઃ દક્ષિણતર્જન્યામ્ ।

ૐ નં નમઃ દક્ષિણમધ્યમાયામ્ ।

ૐ મોં નમઃ દક્ષિણાનામિકાયામ્ ।

ૐ ભં નમઃ દક્ષિણકનિષ્ઠિકાયામ્ ।

ૐ ગં નમઃ વામકનિષ્ઠિકાયામ્ ।

ૐ વં નમઃ વામાનામિકાયામ્ ।

ૐ તેં નમઃ વામમધ્યમાયામ્ ।

ૐ વાં નમઃ વામતર્જન્યામ્ ।

ૐ સું નમઃ દક્ષિણાંગુષ્ઠોર્ધ્વપર્વણિ ।

ૐ દેં નમઃ દક્ષિણાંગુષ્ઠાય પર્વણિ ।

ૐ વાં નમઃ વામાંગુષ્ઠોર્ધ્વપર્વણિ ।

ૐ યં નમઃ વામાંગુષ્ઠાય પર્વણિ ॥

વિષ્ણુષડક્ષરન્યાસઃ -

ૐ ૐ નમઃ હૃદયે ।
ૐ વિં નમઃ મૂર્ધનિ ।
ૐ ષં નમઃ ભ્રુવોર્મધ્યે ।
ૐ ણં નમઃ શિખાયામ્ ।
ૐ વેં નમઃ નેત્રયોઃ ।
ૐ નં નમઃ સર્વસન્ધિષુ ।
ૐ મઃ અસ્ત્રાય ફટ્ પ્રાચ્યામ્ ।
ૐ મઃ અસ્ત્રાય ફટ્ આગ્નેયામ્ ।
ૐ મઃ અસ્ત્રાય ફટ્ દક્ષિણસ્યામ્ ।
ૐ મઃ અસ્ત્રાય ફટ્ નૈરૃત્યે ।
ૐ મઃ અસ્ત્રાય ફટ્ પ્રતીચ્યામ્ ।
ૐ મઃ અસ્ત્રાય ફટ્ વાયવ્યે ।
ૐ મઃ અસ્ત્રાય ફટ્ ઉદીચ્યામ્ ।
ૐ મઃ અસ્ત્રાય ફટ્ ઐશાન્યામ્ ।
ૐ મઃ અસ્ત્રાય ફટ્ ઊર્ધ્વાયામ્ ।
ૐ મઃ અસ્ત્રાય ફટ્ અધરાયામ્ ॥

અથ શ્રીનારાયણકવચમ્ ।
રાજોવાચ ।
યયા ગુપ્તઃ સહસ્રાક્ષઃ સવાહાન્રિપુસૈનિકાન્ ।
ક્રીડન્નિવ વિનિર્જિત્ય ત્રિલોક્યા બુભુજે શ્રિયમ્ ॥ ૧॥

ભગવંસ્તન્મમાખ્યાહિ વર્મ નારાયણાત્મકમ્ ।
યથાઽઽતતાયિનઃ શત્રૂન્ યેન ગુપ્તોઽજયન્મૃધે ॥ ૨॥

શ્રીશુક ઉવાચ ।
વૃતઃ પુરોહિતસ્ત્વાષ્ટ્રો મહેન્દ્રાયાનુપૃચ્છતે ।
નારાયણાખ્યં વર્માહ તદિહૈકમનાઃ શૃણુ ॥ ૩॥

વિશ્વરૂપ ઉવાચ ।
ધૌતાઙ્ઘ્રિપાણિરાચમ્ય સપવિત્ર ઉદઙ્મુખઃ ।
કૃતસ્વાઙ્ગકરન્યાસો મન્ત્રાભ્યાં વાગ્યતઃ શુચિઃ ॥ ૪॥

નારાયણમયં વર્મ સન્નહ્યેદ્ભય આગતે ।
પાદયોર્જાનુનોરૂર્વોરુદરે હૃદ્યથોરસિ ॥ ૫॥

મુખે શિરસ્યાનુપૂર્વ્યાદોઙ્કારાદીનિ વિન્યસેત્ ।
ૐ નમો નારાયણાયેતિ વિપર્યયમથાપિ વા ॥ ૬॥

કરન્યાસં તતઃ કુર્યાદ્દ્વાદશાક્ષરવિદ્યયા ।
પ્રણવાદિયકારાન્તમઙ્ગુલ્યઙ્ગુષ્ઠપર્વસુ ॥ ૭॥

ન્યસેદ્ધૃદય ઓઙ્કારં વિકારમનુ મૂર્ધનિ ।
ષકારં તુ ભ્રુવોર્મધ્યે ણકારં શિખયા દિશેત્ ॥ ૮॥

વેકારં નેત્રયોર્યુઞ્જ્યાન્નકારં સર્વસન્ધિષુ ।
મકારમસ્ત્રમુદ્દિશ્ય મન્ત્રમૂર્તિર્ભવેદ્બુધઃ ॥ ૯॥

સવિસર્ગં ફડન્તં તત્ સર્વદિક્ષુ વિનિર્દિશેત્ ।
ૐ વિષ્ણવે નમ ઇતિ ॥ ૧૦॥

આત્માનં પરમં ધ્યાયેદ્ધ્યેયં ષટ્શક્તિભિર્યુતમ્ ।
વિદ્યાતેજસ્તપોમૂર્તિમિમં મન્ત્રમુદાહરેત્ ॥ ૧૧॥

ૐ હરિર્વિદધ્યાન્મમ સર્વરક્ષાં
ન્યસ્તાઙ્ઘ્રિપદ્મઃ પતગેન્દ્રપૃષ્ઠે ।
દરારિચર્માસિગદેષુચાપ-
પાશાન્દધાનોઽષ્ટગુણોઽષ્ટબાહુઃ ॥ ૧૨॥

જલેષુ માં રક્ષતુ મત્સ્યમૂર્તિ-
ર્યાદોગણેભ્યો વરુણસ્ય પાશાત્ ।
સ્થલેષુ માયાવટુવામનોઽવ્યાત્
ત્રિવિક્રમઃ ખેઽવતુ વિશ્વરૂપઃ ॥ ૧૩॥

દુર્ગેષ્વટવ્યાજિમુખાદિષુ પ્રભુઃ
પાયાન્નૃસિંહોઽસુરયૂથપારિઃ ।
વિમુઞ્ચતો યસ્ય મહાટ્ટહાસં
દિશો વિનેદુર્ન્યપતંશ્ચ ગર્ભાઃ ॥ ૧૪॥

રક્ષત્વસૌ માધ્વનિ યજ્ઞકલ્પઃ
સ્વદંષ્ટ્રયોન્નીતધરો વરાહઃ ।
રામોઽદ્રિકૂટેષ્વથ વિપ્રવાસે
સલક્ષ્મણોઽવ્યાદ્ભરતાગ્રજોઽસ્માન્ ॥ ૧૫॥

મામુગ્રધર્માદખિલાત્પ્રમાદા-

ન્નારાયણઃ પાતુ નરશ્ચ હાસાત્ ।
દત્તસ્ત્વયોગાદથ યોગનાથઃ
પાયાદ્ગુણેશઃ કપિલઃ કર્મબન્ધાત્ ॥ ૧૬॥

સનત્કુમારોઽવતુ કામદેવા-
દ્ધયશીર્ષા માં પથિ દેવહેલનાત્ ।
દેવર્ષિવર્યઃ પુરુષાર્ચનાન્તરાત્
કૂર્મો હરિર્માં નિરયાદશેષાત્ ॥ ૧૭॥

ધન્વન્તરિર્ભગવાન્પાત્વપથ્યા-
દ્દ્વન્દ્વાદ્ભયાદૃષભો નિર્જિતાત્મા ।
યજ્ઞશ્ચ લોકાદવતાજ્જનાન્તા-
દ્બલો ગણાત્ક્રોધવશાદહીન્દ્રઃ ॥ ૧૮॥

દ્વૈપાયનો ભગવાનપ્રબોધા-
દ્બુદ્ધસ્તુ પાખણ્ડગણપ્રમાદાત્ ।
કલ્કિઃ કલેઃ કાલમલાત્પ્રપાતુ
ધર્માવનાયોરુકૃતાવતારઃ ॥ ૧૯॥

માં કેશવો ગદયા પ્રાતરવ્યા-
દ્ગોવિન્દ આસઙ્ગવમાત્તવેણુઃ ।
નારાયણઃ પ્રાહ્ણ ઉદાત્તશક્તિ-
ર્મધ્યન્દિને વિષ્ણુરરીન્દ્રપાણિઃ ॥ ૨૦॥

દેવોઽપરાહ્ણે મધુહોગ્રધન્વા
સાયં ત્રિધામાવતુ માધવો મામ્ ।
દોષે હૃષીકેશ ઉતાર્ધરાત્રે
નિશીથ એકોઽવતુ પદ્મનાભઃ ॥ ૨૧॥

શ્રીવત્સધામાપરરાત્ર ઈશઃ
પ્રત્યૂષ ઈશોઽસિધરો જનાર્દનઃ ।
દામોદરોઽવ્યાદનુસન્ધ્યં પ્રભાતે
વિશ્વેશ્વરો ભગવાન્ કાલમૂર્તિઃ ॥ ૨૨॥

ચક્રં યુગાન્તાનલતિગ્મનેમિ
ભ્રમત્સમન્તાદ્ભગવત્પ્રયુક્તમ્ ।
દન્દગ્ધિ દન્દગ્ધ્યરિસૈન્યમાશુ

કક્ષં યથા વાતસખો હુતાશઃ ॥ ૨૩॥

ગદેઽશનિસ્પર્શનવિસ્ફુલિઙ્ગે
નિષ્પિણ્ઢિ નિષ્પિણ્ઢ્યજિતપ્રિયાસિ ।
કૂષ્માણ્ડવૈનાયકયક્ષરક્ષો-
ભૂતગ્રહાંશ્ચૂર્ણય ચૂર્ણયારીન્ ॥ ૨૪॥

ત્વં યાતુધાનપ્રમથપ્રેતમાતૃ-
પિશાચવિપ્રગ્રહઘોરદૃષ્ટીન્ ।
દરેન્દ્ર વિદ્રાવય કૃષ્ણપૂરિતો
ભીમસ્વનોઽરેર્હૃદયાનિ કમ્પયન્ ॥ ૨૫॥

ત્વં તિગ્મધારાસિવરારિસૈન્ય-
મીશપ્રયુક્તો મમ છિન્ધિ છિન્ધિ ।
ચક્ષૂંષિ ચર્મઞ્છતચન્દ્ર છાદય
દ્વિષામઘોનાં હર પાપચક્ષુષામ્ ॥ ૨૬॥

યન્નો ભયં ગ્રહેભ્યોઽભૂત્કેતુભ્યો નૃભ્ય એવ ચ ।
સરીસૃપેભ્યો દંષ્ટ્રિભ્યો ભૂતેભ્યોંઽહોભ્ય એવ ચ ॥ ૨૭॥

સર્વાણ્યેતાનિ ભગવન્નામરૂપાસ્ત્રકીર્તનાત્ ।
પ્રયાન્તુ સઙ્ક્ષયં સદ્યો યે નઃ શ્રેયઃપ્રતીપકાઃ ॥ ૨૮॥

ગરુડો ભગવાન્ સ્તોત્રસ્તોભશ્છન્દોમયઃ પ્રભુઃ ।
રક્ષત્વશેષકૃચ્છ્રેભ્યો વિષ્વક્સેનઃ સ્વનામભિઃ ॥ ૨૯ ॥

સર્વાપદ્ભ્યો હરેર્નામરૂપયાનાયુધાનિ નઃ ।
બુદ્ધીન્દ્રિયમનઃપ્રાણાન્પાન્તુ પાર્ષદભૂષણાઃ ॥ ૩૦॥

યથા હિ ભગવાનેવ વસ્તુતઃ સદસચ્ચ યત્ ।
સત્યેનાનેન નઃ સર્વે યાન્તુ નાશમુપદ્રવાઃ ॥ ૩૧॥

યથૈકાત્મ્યાનુભાવાનાં વિકલ્પરહિતઃ સ્વયમ્ ।
ભૂષણાયુધલિઙ્ગાખ્યા ધત્તે શક્તીઃ સ્વમાયયા ॥ ૩૨॥

તેનૈવ સત્યમાનેન સર્વજ્ઞો ભગવાન્ હરિઃ ।
પાતુ સર્વૈઃ સ્વરૂપૈર્નઃ સદા સર્વત્ર સર્વગઃ ॥ ૩૩॥

વિદિક્ષુ દિક્ષૂર્ધ્વમધઃ સમન્તા-

દન્તર્બહિર્ભગવાન્નારસિંહઃ ।
પ્રહાપયઁલ્લોકભયં સ્વનેન
સ્વતેજસા ગ્રસ્તસમસ્તતેજાઃ ॥ ૩૪॥

મઘવન્નિદમાખ્યાતં વર્મ નારાયણાત્મકમ્ ।
વિજેષ્યસ્યઞ્જસા યેન દંશિતોઽસુરયૂથપાન્ ॥ ૩૫॥

એતદ્ધારયમાણસ્તુ યં યં પશ્યતિ ચક્ષુષા ।
પદા વા સંસ્પૃશેત્સદ્યઃ સાધ્વસાત્સ વિમુચ્યતે ॥ ૩૬॥

ન કુતશ્ચિદ્ભયં તસ્ય વિદ્યાં ધારયતો ભવેત્ ।
રાજદસ્યુગ્રહાદિભ્યો વ્યાઘ્રાદિભ્યશ્ચ કર્હિચિત્ ॥ ૩૭॥

ઇમાં વિદ્યાં પુરા કશ્ચિત્કૌશિકો ધારયન્ દ્વિજઃ ।
યોગધારણયા સ્વાઙ્ગં જહૌ સ મરુધન્વનિ ॥ ૩૮॥

તસ્યોપરિ વિમાનેન ગન્ધર્વપતિરેકદા ।
યયૌ ચિત્રરથઃ સ્ત્રીભિર્વૃતો યત્ર દ્વિજક્ષયઃ ॥ ૩૯ ॥

ગગનાન્ન્યપતત્સદ્યઃ સવિમાનો હ્યવાક્શિરાઃ ।
સ વાલખિલ્યવચનાદસ્થીન્યાદાય વિસ્મિતઃ ।
પ્રાસ્ય પ્રાચીસરસ્વત્યાં સ્નાત્વા ધામ સ્વમન્વગાત્ ॥ ૪૦॥

શ્રીશુક ઉવાચ ।
ય ઇદં શ ૃણુયાત્કાલે યો ધારયતિ ચાદૃતઃ ।
તં નમસ્યન્તિ ભૂતાનિ મુચ્યતે સર્વતો ભયાત્ ॥ ૪૧॥

એતાં વિદ્યામધિગતો વિશ્વરૂપાચ્છતક્રતુઃ ।
ત્રૈલોક્યલક્ષ્મીં બુભુજે વિનિર્જિત્ય મૃધેઽસુરાન્ ॥ ૪૨॥

॥ ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે પારમહંસ્યાં સંહિતાયાં
ષષ્ઠસ્કન્ધે નારાયણવર્મકથનં નામાષ્ટમોઽધ્યાયઃ ॥

The nyAsa in the beginning is from 13 kavacha sangraha.
The kavacha is from Bhagavatam and does not include nyAsa system.

*Shri Narayana Kavacham*

pdf was typeset on February 28, 2024

Please send corrections to *sanskrit@cheerful.com*